श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीपद्मपुराणे

॥ श्री दामोदराष्टकम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्री दामोदराष्टकम् ॥

नमामीश्वरं सच्चिदानन्दरूपं
लसत्कुण्डलं गोकुले भ्राजमानम्।
यशोदाभियोलूखलाद्धावमानं
परामृष्टम् अत्यन्ततो द्रुत्य गोप्या॥ 1 ॥

रुदन्तं मुहुर्नेत्रयुग्मं मृजन्तं
कराभ्भोज -युग्मेन सातङ्कनेत्रम्।
मुहुःश्वास कंप -त्रिरेखाङ्ककण्ठ -
स्थितग्रैव दामोदरं भक्तिबद्धम्॥ 2 ॥

इतीदृक् स्वलीलाभिरानन्द कुण्डे
स्वघोषं निमज्जन्तमाख्यापयन्तम्।
तदीयेशितज्ञेषु भक्तैर्जितत्वं
पुनः प्रेमतस्तं शतावृत्ति वन्दे॥ 3 ॥

वरं देव ! मोक्षं न मोक्षावधिं वा
न चान्यं वृणेऽहं वरेशादपीह।
इदं ते वपुर्नाथ गोपाल बालं
सदा मे मनस्याविरास्तां किमन्यैः॥ 4 ॥

इदं ते मुखाभ्भोजमत्यन्तनीलै -
र्वृतं कुन्तलैः स्निग्धरक्तैश्च गोप्या।
मुहुश्चुम्बितं बिम्बरक्ताधरं मे
मनस्याविरास्तामलं लक्षलाभैः॥ 5 ॥

नमो देव दामोदरानन्त विष्णो
प्रसीद प्रभो दुःख जालाब्धिमग्नम्।
कृपादृष्टि वृष्ट्यातिदीनं बतानु -
गृहाणेश मामज्ञमेध्यक्षिदृश्यः॥ 6॥

कुबेरात्मजौ बद्धमूर्त्यैव यद्वत्
त्वयामोचितौ भक्तिभाजौकृतौ च।
तथा प्रेमभक्तिं स्वकां मे प्रयच्छ
न मोक्षे ग्रहो मेऽस्ति दामोदरेह॥ 7॥

नमस्तेऽस्तु दाम्ने स्फुरद्दीप्तिधाम्ने
त्वदीयोदरायाथ विश्वस्य धाम्ने।
नमो राधिकायै त्वदीयप्रियायै
नमोऽनन्त लीलाय देवाय तुभ्यम्॥ 8॥

॥ इति श्री दामोदराष्टकं समाप्तम्॥